पूर्वं न मयेति का गतिः”किरा०“का गतिः किं प्रमाणम्”मल्लि०। आधारे क्तिन्। ५सरणौ पथि“भिन्नगतिर्हि लोकः”रघुः।६स्थाने च।“कां गतिं कृष्ण ! गच्छति” गीता“गतिं प्रतापस्य जलत्प्रमाथिनः” किरा० “गतिं स्थानम्” मल्लि०। गम्यते कर्म्मणि क्तिन्। ७स्वरूपे “न वयं निरूपयितुमस्य गतिम्” किरा० “गतिं स्वरूपम्” मल्लि०। ८विषये च “मनोरथानामगतिर्न विद्यते”कुमा०“अगतिरविषयः” मल्लि०। भावे क्तिन्। ९यात्रायाम्। करणे क्तिन् १०अभ्युपाये “कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा” पुरा०। ११नाड़ीव्रणे मेदि०। पक्षिग्रहगतिभेदाश्च खगगतिशब्दे २४१५पृ० उक्ताः। वृह० स० ७अ० नक्षत्रभेदेन बुधस्य गतिभेदास्तत्फलभेदाश्चोक्ता यथा

“प्राकृतविमिश्रसङ्क्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः। सप्त पराशरतन्त्रे नक्षत्रैः कीर्तिता गतयः। प्राकृतसञ्ज्ञा१ वायव्य१५याम्य२पैतामह्यानि४ वह्नलाश्च३। मिश्रा गतिः२ प्रदिष्टा शशि५शिव६पितृ१०भुजग९दैवानि। सङ्क्षिप्तायां३ पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति। तीक्ष्णायां४भाद्रपदाद्वयं सशाक्राश्वयुक्१८।१। पौष्णम्२७। योगान्तिकेति५ मूलं द्वे चषाढे गतिः सुतस्येन्दोः। घोरा६ श्रवणस्त्वाष्ट्रं१४ वासवं२३ वारुणं२४ चैव,पापाख्या७। सवितं१३ मैत्रं१७ शक्राग्निदैवतं१६ चेति। उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह। चत्वारिंशत्त्रिंशद्द्विसमेता विंशतिः२२र्द्विनवकं च१८। नव मासार्धं दश चैकसंयुताः११ प्राकृताद्यानाम्। प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम्। सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम्। ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः। पञ्चचतुर्द्व्येकाहा ऋज्व्यादीनां षडभ्यस्ताः। ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्विनाशयति। शस्त्रभयदा च वक्रा विकला भयरोगसञ्जननी।”

पाणिन्युक्तेषु प्रादिषु१२शब्दविशेषेषु पु० ते च “प्रादयः” “उपसर्गाः क्रियायोगे”“गतिश्च” “ऊर्यादिच्विडाचश्च” “अनुकरणं चानितिपरम्”“आदरानादरयोः सदसती” भूषणेऽलम् “अन्तरपरिग्रहे” “कणेमनसी” “श्रद्धाप्रतीघाते” “पुरोऽव्ययम्” “अस्तं च” “अच्छ गत्यर्थवदेषु” “अदोऽनुपदेशे” “तिरोऽन्तर्धौ” “विभाषा कृञि” “उपाजेऽन्वाजे” “साक्षात्प्रभृतीनि च” “अनत्याधाने उरसिमनसी” “मध्ये पदे निवचने च” “नित्यं हस्ते पाणावुपयमने” “प्राध्वं बन्धने” “जीविकोपनिषदावौपम्ये।” पा० उक्ताः धातुविशेषयोग एव तत्संज्ञां भजन्ते धातुविशेषाश्च सि०कौ० त०स०प्र० दृश्याः। तेषाञ्च गतिसंज्ञकानां “गतिर्गतौ” पा० अनुदात्तता। “सगतिरपि तिङ्” पा०। काष्ठं प्रपचतीत्यादौ अनुदात्तता। “गतिरनन्तरः” पा० “कर्म्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या”। पुरोहितम्। “गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः” वार्त्ति०। “गतिबुद्ध्यादि”पा०णिचि प्रयोज्यकर्त्तुः कर्म्मत्वम् ग्रामं गमयति देवदत्तम् चैत्रः। गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि” पा०। ग्रामं ग्रामाय वा गच्छति अध्वनि तु मार्गं गच्छति। अचेष्टायां मनसा गच्छति “गत्यर्थाकर्म्मकेत्यादि” पा० कर्त्तरि च क्त। ग्रामं गतश्चैत्रः चकारात् भावे कर्म्मणि च गतं चैत्रस्य, गतो ग्रामश्चैत्रेण। “क्तोऽधिकरणे च” “ध्रौव्यगतिप्रत्यवसानेत्यादि” पा० आधारे क्त। “इदं यातं रमापतेः” सि० कौ०। सर्वे गत्यर्था ज्ञानार्थाः प्राप्त्यर्थाश्चेत्युक्तेः “मतिबुद्धिपूजार्थेभ्यश्च” पा० वर्त्तमानेऽपि क्त। शास्त्रमधिगतम् विप्रेण वर्त्तते, तेन ज्ञायमानमित्यर्थः। गत्यर्थकधातवश्च गणपाठे पठिता एव ज्ञेयाः। वैदिकप्रयोगे तु केचित्ततोऽन्येऽपि धातवः समष्ट्या निघण्टौ पठिता यथा

“वर्तते। अयते। लोटते। लोठते। स्यन्दते। कसति। सर्पति। स्यमति। स्रवति। स्रंसते। श्वति। स्रोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। कालयति। पेलयति। कण्टति। पिस्यति। विस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते। गवते। नवते। क्षोदति। नक्षति। सक्षति। म्यक्षति। सचति। ऋच्छति। तुरीयति। चर्दति। अतति। गाति। इयर्त्ति। सस्नति। त्सरति। रंहति। यतते। भ्रमति। ध्रजति। रजति। लजति। क्षियति। धमति। मिनाति। ऋण्वति। ऋणोति। स्वरति। सिसर्ति। वेविष्टि। योषिष्टि। रिणाति। रीयते। रेजति। दध्यति। दभ्नोति। युध्यति। धन्वति। अरुषति। आर्यति। डीयते। तकति। दीयति। ईषति। फणति। हनति। अर्दति। मर्दति। सस्र्ते। नसते। हर्यति। इयर्ति। ईर्ते। ईङ्खते। जयति। श्वात्रति। गन्ति। आ गनीगन्ति। जङ्घन्ति।